शांकालरात्रिमिवोद्यतां ॥ गजवाजिमनुष्याणांप्राणांतकरणीमपि ॥ हेमपट्टपरिष्कृ
तामुल्कांप्रज्वलितामिव । पट्टघंटस्वनशतांवासवीमसनीमिव ॥ निर्मुक्ताशीविषाका
रांपृक्तांगजमदैरपि ॥ त्रासनीरिपुसैन्यानांस्वसैन्यपरिहर्षणीं । मनुष्यलोकेविख्याता
गिरिशृंगविदारणीं ॥ ययाकैलासभवनेमहेश्वरसखंबली ॥ आह्वयामासकौंतेयसंक्रु
द्धमलकाधिपं । जघामायायान्दृप्तान्सुबहून्गंधमादने । जघानगुह्यकान्क्रुद्धोमंदारार्थे
महाबलः ॥ वार्यमाणोपिबहुद्रौपद्याःप्रिययामास्थितः ॥ तांवज्रमणिवज्जारत्न्याष्टाम
ष्टांसिवज्रगौरवां ॥ समुद्यम्यमहाबाहुःशल्यमभ्यद्रवद्रणे । गदयायुद्धकुशलस्तया
दारुणनादया ॥ पोथयामासशल्यस्यचतुरोऽश्वान्महाजवान् ॥ ततःशल्योरणेक्रुद्धःपी
नेवक्षसितोमरं ॥

निखवाननदन्वीरोवमन्नित्तास्यसोभ्यगात् ॥ वृकोदरस्त्वसंभ्रान्तस्तमेवाहृस
मरं ॥ यंतारं मद्रराजस्य निर्बिदत्ततोहृदि ॥ सभिन्नमर्मारुधिरांवमन्नविव्रस्तमानसः ॥
पपाता ॥ जिसुरेवादिनो मद्रराजस्त्वयाक्रमत् ॥ कृतप्रतिकृतंदृष्ट्वा शल्यो विस्मितमानसः ॥
गदामा ॥ अथसंधीरात्माप्रससाभिव मवेक्षतो ॥ ततःसुमनसःपार्थाःभीमसेनमपूजयत् ॥ तंदृष्ट्वा
कमस्संग्रामे घोरमक्लिष्टकर्मणः ॥ ✿ ॥ ॥ इतिमहाभारतेशल्यपर्वणी ॥ ॥ संजय उवाच ॥ ॥
पतितंप्रेक्ष्ययंतारंशल्यःसर्वायसींगदां ॥ आदायतरसा राजंस्तस्थौगिरिरिवाचलः ॥ तंदीप्त
मिवकालाग्निं पाशहस्तमिवांतकं ॥ संसृंगमिवकैलासंसवज्रमिववासवं ॥ सशूलमिवह
र्यक्षंवनेमत्तइवद्विपः ॥ जवेनाभ्यपतद्भीमःप्रगृह्यमहतीं गदां ॥ ततःशंखप्रणादैश्चतू
र्याणांचसहस्रशः ॥ सिंहनादश्चसंजज्ञेशूराणांहर्षवर्द्धनः ॥ सर्वशस्त्राहियाद्धारयोघा
व्याघमहाद्विपौ ॥ तावकाश्चपरेचैवसाधुसाध्वित्यपूजयन् ॥ नाहिमद्राधिप दन्यारामाद्वा
यदुनंदनात् ॥ सोढुमुत्सहतेवेगंभीमसेनस्यसंयुगे ॥ तथामद्राधिपस्यापिगदावेगंमहात्म
नः ॥ सोढुमुत्सहतेन्योयोधायुधेवृकोदरात् ॥ तौवृषाविवनर्दन्तौमंडलानिविचेरतुः
आवल्गितौगदाहस्तौमद्रराजवृकोदरौ ॥ मंडलावर्तमार्गेषुगदाविहरणेषुच ॥ निर्वि शेषम
भूद्युद्धंतयोःपुरुषसिंहयोः ॥ तप्तहेममयेशुभ्रैर्बभूवभयवर्द्धनी ॥ अग्निज्वालैरिवाबद्ध
पट्टैःशल्यस्यसागदा ॥ तथैवचरतोमार्गान्मंडलेषुमहात्मनः ॥ विद्युदभ्र प्रतीकाशा
भीमस्यशुशुभेगदा ॥ ताडितामद्रराजेनभीमस्य गदयागदा ॥ दह्यमानेवराजन्ससृजे
पावकार्चिषः ॥ तथा

भीमेनशल्यस्यताडितागदयागदा ॥ अंगारवर्षंमुमुचेतदद्भुतमिवाभवत् ॥ दंतैरिवमहा
नागौशृंगैरिवमहर्षभौ ॥ तोत्रैरिवतदान्योन्यंगदाग्राभ्यांनिजघ्नतुः ॥ तौगदानिहतौगा
त्रैःक्षणेनरुधिरोक्षितौ ॥ प्रेक्षणीयतरावास्तांपुष्पिताविवकिंशुकौ ॥ गदयामद्रराजेन
सव्यदक्षिणमाहतः ॥ भीमसेनोमहाबाहुर्नचचालाचलोयथा ॥ तथाभीमगदावेगैस्ताड्यमानो
मुहुर्मुहुः ॥ शल्योनविव्यथेराजन्दंतिनेवमहागिरिः ॥ शुश्रुवेदिक्षुसर्वासुतयोःपुरुषसिंह
योः ॥ गदानिपातसंह्रादोवज्रयोरिवनिस्वनः ॥ निवृत्यतुमहावीर्यौसमुच्छ्रितगदावुभौ ॥ पुन
रंतरमार्गस्थौमंडलानिविचेरतुः ॥ अथाभ्येत्यपदान्यष्टौसंनिपातोभवत्तयोः ॥ उद्यम्य
लोहदंडाभ्यामतिमानुषकर्मणोः ॥ प्रार्थयानौतदान्योन्यंमंडलानिविचेरतुः ॥ क्रियाविशे
षंकृतिनौदर्शयामासतुस्तदा ॥ अथोद्यम्यगदेघोरेसशृंगाविवपर्वतौ ॥ तावाजघ्नतुरन्योन्यं
यथाभूमिचलेचलौ ॥ तौपरस्परवेगाच्चगदाभ्यांभृशविक्षतौ ॥ युगपत्पेततुर्वीरावुभावि
द्रध्वजाविव ॥ उभयोःसेनयोर्वीरास्तदाहाहाकृताभवन् ॥ भृशंमर्मण्यभिहताउभावास्तांसु
विह्वलौ ॥ ततःस्वरथमारोप्यमद्राणामृषभंबली ॥ अपोवाहकृपःशल्यंतूर्णमायोध
नादपि ॥ क्षीववद्विह्वलत्वात्तुनिमेषात्पुनरुत्थितः ॥ भीमसेनोगदापाणिःसमाह्वयतमद्रपः ॥
ततस्तुतावकाःशूरानानाशस्त्रसमायुताः ॥ नानावादित्रशब्देनपांडुसेनामयोधयन् ॥ भुजा
वुच्छ्रित्यशस्त्रांश्चशब्देनमहतातत ॥ अभ्यद्रवन्महाराजदुर्योधनपुरोगमाः ॥ तदनिकम
भिप्रेक्षततस्तेपांडुनंदन ॥ प्रययुःसिंहनादेनदुर्योधनपुरोगमान् ॥ तेषामापततांतूर्णंपुत्रस्ते

भरतर्षभ ॥ कृपश्च कृतवर्मा च सौबलश्च महाबलः ॥ अयोधयन्धर्मराजं मद्रराजं
पुरस्कृताः ॥ भारद्वाजस्य हंतारं भूरिवीर्यपराक्रमं ॥ दुर्योधनो महाराज धृष्टद्युम्नमयोधयत् ॥
त्रिसाहस्रा रथा राजंस्तव पुत्रेण चोदिताः ॥ अयोधयंत विजयं द्रोणपुत्रपुरस्कृताः ॥ विजये
धृतसंकल्पाः समभिसक्ता विजिताः ॥ प्रविशंस्तावका राजन्सिंहा इव महत्सरः ॥ ततो युद्ध
मभूद्घोरं परस्परवधैषिणां ॥ अन्योन्यवधसंयुक्तमन्योन्यप्रीतिवर्धनं ॥ तस्मिन्प्रवृत्ते संग्रामे
राजन्वीरवरक्षये ॥ अनिलेनेरितं घोरमुत्तस्थौ पार्थिवं रजः ॥ श्रवणान्नामधेयानां पांडु
वानां च कीर्तनात् ॥ परस्परं विजानीमो यद्युध्यन्नभीतवत् ॥ तद्रजः पुरुषव्याघ्र शोणितेन म
प्रसामितं ॥ दिशश्च विमला जज्ञुस्तस्मिंस्तमसि शामिते ॥ तथा प्रवृत्ते संग्रामे भीमरूप
भयानके ॥ तावकानां परेषां च नासीत्कश्चित्पराङ्मुखः ॥ ब्रह्मलोकपरा भूत्वा प्रार्थयंतो ज
यं युधि ॥ सुयुद्धेन पराक्रांता नराः स्वर्गमभीप्सवः ॥ भर्तृपिंडमवोक्षार्थं तवपुत्रे विनिश्चिताः ॥
स्वर्गसंसक्तमनसो योधा युयुधिरे तदा ॥ नानारूपाणि शस्त्राणि विसृजंतो महारथाः ॥
अन्योन्यमभिगर्जंतः प्रहरंतः परस्परं ॥ हत रुध्यत गृह्णीत प्रहरध्वं निकृंतत ॥ इतीस्म
वाचः श्रूयंते तव तेषां च वै बले ॥ ततः शल्यो महाराज धर्मराजं युधिष्ठिरं ॥ विव्याध निशितैर्बा
णैः हंतुकामो महारथं ॥ तस्य पार्थो महाराज नाराचान्वै चतुर्दश ॥ मर्माण्युद्दिश्य मर्मज्ञो

निश्वरवानसन्निव॥ आवार्यापांडवाणेहंतुकामोथमद्रपः॥ विव्याधसमरेक्रुद्धोबहु
भिःकंकपत्रिभिः॥ अथमुयोमहाराजशरेणानतपर्वणा॥ युधिष्ठिरंसमाजघ्नेसवसिंन्न
न्यस्यपस्यतः॥ धर्मसूनोपिसंक्रुद्धोमद्रराजंमहाजसं॥ विव्याधनिशितैर्बाणैःकंकबर्हि
णराजितैः॥ चंद्रसेनंचसप्रह्रासुतंचनवभिःशरैः॥ द्रुमसेनंचतुषष्ट्यानिजघानमहार
थाः॥ चक्ररक्षौहतौशल्यःपांडवेनमहात्मना॥ निजघानततोराजंश्चेदिन्वैपंचविंशति॥
सात्यकिंपंचविंशत्याभीमसेनंचसप्तभिः॥ माद्रीपुत्रौशतेनाजौविव्याधनिशितैःशरैः॥
एवंविचरतस्तस्यसंग्रामेराजसत्तमे॥ संपेषयच्छितान्पार्थःशरानासीविशोपमान्॥
ध्वजाग्रंचास्यसमरेकुंतीपुत्रोयुधिष्ठिरः॥ प्रमुखेवर्त्तमानस्यमल्लेनापाहरद्रथात्॥ पांडु
पुत्रेणवैतस्यकेतुंछिन्नोमहाहवे॥ निपपातंतमपस्यामगिरिशृंगमिवाहतं॥ ध्वजं
निपतितंदृष्ट्वापांडवंचव्यवस्थितं॥ संक्रुद्धोमद्रराजोभूच्छरवर्षंमुमोचह॥ शल्यः
सायकवर्षेणपर्जन्यइववृष्टिमान्॥ अभ्यवर्शदमेयात्माक्षत्रियान्क्षत्रियर्षभः॥
सात्यकिंभीमसेनंचमाद्रीपुत्रौचपांडवौ॥ एकैकंपंचविध्वायुधिष्ठिरमपीडयत्॥
ततोबाणमयंजालंविततंपांडवोरसि॥ अथापस्यंमहाराजमेघजालमिवोद्गते॥
तस्यशल्योरणेक्रुद्धोबाणैःसन्नतपर्वभिः॥ दिशःप्रच्छादया सप्रदिशश्चमहारथः॥
ततोयुधिष्ठिरोराजाबाणजालेनपीडिताः॥ बभूवहृतविक्रांतोजंभोवृत्रहणायथा॥
॥ ॥इतिमहाभारतेशल्यपर्वणि॥

शल्य०

॥२१॥

॥संजयउवाच॥ ॥पीडितेधर्मराजेतुमद्रराजेनमारिष॥सात्यकिर्भीमसेनश्चमाद्रीपुत्रौच
पांडवौ॥परिवार्यरथैःशल्यंपीडयामासुराहवे॥तमेकंबहुभिर्दृष्ट्वापीड्यमानंमहा
रथैः॥साधुवादोमहाञ्जज्ञेसिद्धाश्चासन्प्रहर्षिताः॥आश्चर्यमित्यभाषंतमुनयश्चापिसंग
ताः॥भीमसेनोरणेशल्यंशल्यभूतंपराक्रमे॥येकेनविद्ध्वाबाणेनपुनर्विव्याधसप्तभिः॥
सात्यकिश्चशतेनैवधर्मपुत्रपरीप्सया॥मद्रेश्वरमवाकीर्यसिंहनादमथानदत्॥नकुलः
पंचभिश्चैनंसहदेवश्चसप्तभिः॥विद्ध्वातंतुततस्तूर्णंपुनर्विव्याधसप्तभिः॥सतुशूरोरथे
यत्तःपीडितस्तैर्महारथैः॥विकृष्यकार्मुकंघोरंवेगघ्नंभारसाधनं॥सात्यकिंपंचविंश
त्याशल्योविव्याधमारिष॥भीमसेनंतुसप्तत्यानकुलंसप्तभिस्तथा॥ततःसविशि
खंचापंसहदेवस्यधन्विनः॥छित्वाभल्लेनसमरेविव्याधैनंत्रिसप्तभिः॥सहदेवस्तुस
मरेशरेणानतपर्वणा॥विव्याधसमरेतूर्णंमातुलंभूरिवर्चसं॥सज्यमन्यद्धनुःकृत्वा
पंचभिःसमताडयत्॥शरैराशीविषाकारैर्ज्वलज्ज्वलनसंनिभैः॥सारथिंचास्यसमरेणा
नतपर्वणा॥विव्याधभृशसंक्रुद्धस्तंचभूयस्त्रिभिःशरैः॥भीमसेनस्तुसप्तसासात्यकिःप २१
चभिःशरैः॥धर्मराजस्तथाषष्ट्यागात्रेशल्यंसमार्पयत्॥ततःशल्योमहाराजनिर्वि
द्धस्तैर्महारथैः॥सुस्रावरुधिरंगात्रैर्गैरिकंपर्वतोयथा॥तांश्चसर्वान्महेष्वासान्पं
चभिःपंचभिःशरैः॥विव्याधतरसाराजंस्तदद्भुतमिवाभवत्॥ततोपरेणभल्लेनधर्मपुत्र [illegible]

धनुश्छिच्छेद समरे सशल्यं स सुमहारथः ॥ अथान्यद्धनुरादाय धर्मपुत्रो महारथः ॥
साश्वसूतध्वजरथं शल्यं प्राच्छादयच्छरैः ॥ प्राच्छाद्यमानः समरे धर्मपुत्रस्य सायकैः ॥
युधिष्ठिरमथाविध्यद्दशभिर्निशितैः शरैः ॥ सात्यकिस्तु ततः क्रुद्धो धर्मपुत्रे सशरार्द्दि
ते ॥ मद्राणामधिपं शूरं शरौघैः समवारयत् ॥ स सात्यकेः प्रचिच्छेद क्षुरप्रेण मह
द्धनुः ॥ भीमसेनमुखांस्तांश्च त्रिभिस्त्रिभिरताडयत् ॥ तस्य क्रुद्धो महाराज सात्यकिः
सत्यविक्रमः ॥ तोमरं प्रेषयामास स्वर्णदंडं महाधनं ॥ भीमसेनोथ नाराचं ज्वलंत
मिव पंन्नगं ॥ नकुलः समरे शक्तिं सहदेवो शुभां गदां ॥ धर्मराजश्शतघ्नीं तु जिघांसु
शल्यमाहवे ॥ तानापतत एवाशु पंचानां वै भुजच्युतान् ॥ स सात्यकिप्रहितं शल्यो भ
ल्लैश्छिच्छेद तोमरं ॥ भीमसेनप्रहितं चापि शरं कनकभूषणं ॥ द्विधा चिच्छेद समरे
कृतहस्तः प्रतापवान् ॥ नकुलः प्रेषितां शक्तिं हेमदंडां भयावहां ॥ गदां च सहदेवेन स
रौघैः समवारयत् ॥ शराभ्यां च शतघ्नीं तां राज्ञश्छिच्छेद भारत ॥ पश्यतां पांडुपुत्राणां
सिंहनादं ननाद च ॥ नामृष्यत्तं तु शैनेयः शत्रोर्विजयमाहवे ॥ अथान्यद्धनुरादाय
सात्यकिः क्रोधमूर्छितः ॥ द्वाभ्यां मद्रेश्वरं विद्ध्वा सारथिं च त्रिभिः शरैः ॥ ततः शल्यो
महाराज सर्वांस्तांदशभिः शरैः ॥ विव्याध सुमहातीक्ष्णैस्तोत्रैरिव महाद्विपान् ॥
ते वार्यमाणाः समरे मद्राराज्ञा महारथाः ॥ न शेकुः प्रमुखे स्थातुं तस्य शत्रुनिसूदनाः ॥

शल्य०

२२

ततो दुर्योधनो राजा दृष्ट्वा शल्यस्य विक्रमं ॥ निहतान्पांडवान्मेने पंचालानथसृंज
यान् ॥ ततो राजन्महाबाहुर्भीमसेनः प्रतापवान् ॥ संत्यज्य मनसा प्राणान् मद्राधिपम
योधयत् ॥ नकुलः सहदेवश्च सात्यकिश्च महारथः ॥ परिवार्य तदा शल्यं समंताद्व्यकि
रंछरैः ॥ स तु चतुर्भिर्महेष्वासैः पांडवानां महारथैः ॥ वृतस्तान्योधयामास मद्रराजः प्रता
पवान् ॥ तस्य धर्मसुतो राजन् क्षुरप्रेण महाहवे ॥ चक्ररक्षं जघानाशु मद्रराजस्य पार्थि
वः ॥ तस्मिंस्तु निहते शूरे चक्ररक्षे महारथे ॥ मद्रराजाति संक्रुद्धः सैनिकांस्ताकिरंछरैः ॥
समाच्छन्नांस्ततस्तांस्तु राजन् वीक्ष्य सैनिकान् ॥ चिंतयामास समरे धर्मराजो युधिष्ठि
रः ॥ कथं नूनं न भवेत्सत्यं तन्माधववचो महत् ॥ नहि क्रुद्धो रणे राजा क्षपयेत बलं मम ॥
ततः सरथनागाश्वाः पांडवाः पांडुपूर्वतः ॥ मद्रेश्वरं समासेदुः पीडयंतः समंततः ॥
नानाशस्त्रौघबहुलां शस्त्रवृष्टिं समुत्थितां ॥ व्यधमत्सहसा राजन्नभ्राणीव च मारुतः ॥
ततः कनकपुंखां तां शल्यक्षिप्तां वियद्गतां ॥ शरवृष्टिमपश्याम शलभानां
मिवायतिं ॥ ते शरा मद्रराजेन प्रेषिता भूरिवर्चसा ॥ समंततः स्म दृश्यंते शाकु
नानां व्रजा इव ॥ मद्रराजधनुर्मुक्तैः शरैः कनकभूषणैः ॥ निरंतरमिवाकाशं सं
वभूव जनाधिप ॥ न पांडवानां नास्माकं तत्र कश्चिद्व्यदृश्यत ॥ बाणांधकारे महति ॥२२
कृते तत्र महाहवे ॥ मद्रराजेन बलिना लाघवाच्छर
वृष्टिभिः ॥

लोडयमानं तया दृष्ट्वा पांडवानां बलार्णवं ।। विस्मयं परमं जग्मुर्देवगंधर्वदानवाः ।।
सतु तान्सर्वतो यत्तान्घोरैः संपीड्य मारिषः ।। धर्मराजमवष्टाप्य सिंहवन्ननदन्मुहुः ।।
तेछिन्नाः समरे तेन पांडवानां महारथाः ।। न सेहुस्तं गदायुद्धे प्रक्रुद्धं महारथं ।। धा
धर्मराजपुरोगास्तु भीमसेनमुखा रथाः ।। नजहुस्तं समरे पूर्वं शल्यमाहवशोभि
तं ।। ।। इति श्रीमहाभारते शल्यपर्वणि ।। ।। संजय उवाच ।। ।। अर्जुनो द्रौणि
नाविद्धो युद्धे बहुभिरायसैः ।। तस्य चानुचरैः शूरैस्त्रिगर्तानां महारथैः ।। द्रौणिर्विव्या
ध समरे त्रिभिरेव शिलीमुखैः ।। तथेतरा महेष्वासा तद्वाभ्यां द्वाभ्यां धनंजयं ।। भूयश्चैव
महाबाहुः शरवर्षैरवाकिरत् ।। शरकंटकितास्ते तु तावका भरतर्षभ ।। नजहुः समरे पार्थं
वध्यमाना शितैः शरैः ।। तेर्जुनं शरवर्षेण द्रोणपुत्रपुरोगमाः ।। अयोधयंत समरे परिवा
र्य महारथं ।। तैस्तु क्षिप्ताः शरा राजन्नानुकाः स्विरं विमसिताः ।। अर्जुनस्य रथोपस्थं पूरय
मासुरंजसा ।। तथा कृष्णौ महेष्वासौ वृषभौ सर्वधन्विनां ।। शरैर्वीक्षितसर्वांगौ प्र
हृष्यपुष्पद्रुमद्दौ ।। कुबेरस्य यथाक्रापिरस्य यथाकाननिवाविमौ ।। युगंते वानुकर्षे च शरभ
ममु तदा ।। नैतादृशं दृष्टपूर्वं राजन्न्येवापि च स्कृतं ।। तादृशं तत्र पार्थस्य तावका संप्र
चक्रिरे ।। सरथः सर्वतो गात्राणि चित्रपुंखैः शितैः शरैः ।। उल्काशतैः संप्रदीप्तं विमानमिव
भूतले ।। ततोऽर्जुनो महाराज शरैः संनतपर्वभिः ।। अवाकिरत्तान्प्रतानां मेघो वृष्ट्या यथाचलं ।।

तेवध्यमाना समरे पार्थनामांकितैः शरैः ॥ पार्थभूतममन्यंत प्रेक्ष्यमानास्तथाविधं ॥ ततोद्भुतशरज्वालो धनुःसद्धानलो महान् ॥ सैन्येंधनं ददाहाशु तावकं पार्थपावकः ॥ चक्राणां पततां चापि युगानां च धरातले ॥ धुर्याणां पततां पताकानां रथैः सह ॥ इषाणामनुकर्षाणां त्रिवेणूनां च भारत ॥ अक्षाणामथ योक्त्राणां प्रतोदानां च सर्वशः ॥ शिरसां पततां चैव कुंडलोष्णीषधारिणां ॥ भुजानां च महाराज जंघानां सह सूत्रैः ॥ छत्राणां व्यजनैः सार्धं मुकुटानां च राशयः ॥ समदृश्यंत पार्थस्य रथमार्गेषु भारत ॥ ततः क्रुद्धस्य पार्थस्य रथमार्गे विशांपते ॥ अगम्यरूपा पृथिवी मांससोनितकर्दमा ॥ बभूव भरतश्रेष्ठ रुद्रस्याक्रीडनं यथा ॥ भीरूणां त्रासजननी शूराणां हर्षवर्धनी ॥ हत्वा तु समरे पार्थः सहस्रे द्वे समंततः ॥ रथानां सवरूथानां विधूमोग्निरिव ज्वलन् ॥ यथा हि भगवानग्निर्जगद्दग्ध्वा चराचरं ॥ विधूमो दृश्यते राजंस्तथा पार्थो महारथः ॥ द्रौणिस्तु समरे दृष्ट्वा पांडवस्य पराक्रमं ॥ रथेनातिपताकेन पांडवं प्रत्यवारयत् ॥ तावुभौ पुरुषव्याघ्रौ श्वेताश्वौ रथिनां वरौ ॥ समीयतुस्तदा तूर्णं परस्परवधैषिणौ ॥ तयोरासीन्महाराज बाणवर्षं सुदारुणं ॥ जीमूतानां यथा वृष्टिस्तपांते भरतर्षभ ॥ अन्योन्यस्पर्द्धिनौ तौ तु शरैः संनतपर्वभिः ॥ ततक्षतुर्मृधेन्योन्यं शृंगाभ्यां वृषभाविव ॥

तयोर्युद्धं महाराज चिरं सममिवाभवत्॥ अस्त्राणां संगमश्चैव घोरस्तत्राभवन्नृपः।
ततोर्जुनं द्वादशाभि रुक्मपुंखैः सुतेजनैः॥ वासुदेवं च दशाभिर्द्रौणिर्विव्याध भारत॥
तत प्रहस्य बीभत्सुर्व्याक्षिपद्गांडिवं धनुः। मानायित्वा मुहूर्तं च गुरुपुत्रं तमाहवे। व्यश्व
सूतरथं चक्रे सव्यसाची महारथः॥ मृदुपूर्वं ततश्चैनं त्रिभिर्विव्याध सायकैः॥ हयाश्च
तुरयेतिष्ठन्द्रोणपुत्रस्तदास्मरन्॥ मुषलं पांडुपुत्राय चिक्षेप परिघोपमं॥ तमाप
तंतं सहसा हेमपट्टविभूषितं। चिछेद सप्तधा वीरः पार्थः शत्रुनिवर्हणः॥ स छिन्नमु
सलं दृष्ट्वा द्रौणिः परमकोपनः। आददे परिघं घोरं नगेंद्रसिखरोपमं। चिक्षेप
चैव पार्थाय द्रौणिर्युद्धविशारदः॥ तमंतकमिव क्रुद्धं परिघं प्रेक्ष्य पांडवः। अर्जुनस्त्व
रितोजघ्ने पंचभि सायकोत्तमैः। सछिन्नपतितो भूमौ पार्थवाणैर्महाहवे। दारयन्
प्रथिवीवानांमनीसितवभारत। ततोपरैस्त्रिभिर्वाणैः द्रौणिं विव्याध पांडवः॥
सोतिविद्धो बलवता पार्थेन सुमहाबलः॥ न संभ्रांतस्तदा द्रौणिः पौरुषेस्वेव्य
वस्थितः। रथेनमेघघोषेण द्रौणिमेवाभ्यधावत॥ विकर्षन्वै धनुः श्रेष्ठं सर्व
भारसहं दृढं। ज्वलं नासि विशानिभैः शरैश्चैनमवाकिरत्। तं वीक्ष्य सुरथं रोष
धनुर्न्यागृमिवमृत्युवत्। मुमुमोचवलीक्ष्णां नाराचं दायमदंडसमद्युतिं। स तस्य हृदयं

शल्य॰

॥२५॥

पिता पुत्रविनाशार्तो वेगितः ॥ शक्त्या शनिरिवोत्सृष्टं विदार्य धरनिं मतं । ततः स पतितो भू
मौ नाराचेन समाहतः ॥ वज्रेण यथया शृंगं पर्वतस्य निपातितं । तस्मिंस्तु निहते वीर
द्रोणपुत्रेण धन्विना ॥ भीमसेनस्ततः षष्ट्या सात्यकिर्नवभिः शरैः ॥ मद्रराजमभि
द्रुत्य जघ्नतुः कंकपत्रिभिः ॥ मद्रराजस्ततः क्रुद्धः सात्यकिं नवभिः शरैः ॥ विव्याध भूयः
सप्तत्या शराणां नतपर्वणां ॥ अस्यतः स शरं चापं मुष्टौ चिच्छेद मारिष । हयांश्च
तुरः संख्ये प्रेषयामास मृत्यवे ॥ विरथं सात्यकिं दृष्ट्वा मद्रराजो महाबलः ॥ विशिखा
नां शतेनैव समाजघान महाबलः ॥ माद्रीपुत्रौ सुसंरब्धौ भीमसेनं च पांडवं । युधिष्ठिरं च
कौरव्यं विव्याध दशभिः शरैः ॥ तत्राद्भुतमपश्याम मद्रराजस्य पौरुषं । यदेनं सहिताः
पार्थाः नाभ्यवर्तंत संयुगे ॥ अथान्यं रथमास्थाय सात्यकिः सत्यविक्रमः ॥ पीडितान्
पांडवान् दृष्ट्वा मद्रराजवशंगतान् । अभिदुद्राव वेगेन मद्राणामधिपं बली ॥ आपतंतं
रथं तस्य शल्यः समितिशोभनः ॥ प्रत्युद्ययौ रथेनैव मत्तो मत्तमिव द्विपं । संनिपा
तस्तुमुलो बभुवाद्भुतदर्शनः ॥ सात्यकेश्चैव शूरस्य मद्राणामधिपस्य च ॥ यादृशो
वै पुरा वृत्तः संबरामरराजयोः ॥ सात्यकिः प्रेक्ष्य समरे मद्रराजं व्यवस्थितं । विव्याध
दशभिर्बाणैः तिष्ठतिष्ठेति चाब्रवीत् ॥ मद्रराजस्तु सुभृशं विद्धस्तेन महात्मना ॥ सात्य
किं प्रतिविव्याध चित्रपुंखैः शितैः शरैः । ततः पार्था महेष्वासाः सात्वताभिसृतं नरं

२५

अभ्यद्रवन्नयैस्तूर्णमद्रं वधकाम्यया॥ तत्रासीन्महारौद्रस्तुमुलःशानि
तोदकः॥ शूराणांयुध्यमानानांसिंहनादमिवनर्दतां॥ तसमासीन्महाराजव्यक्षपंतपर
स्परं॥ सिंहानामामिषेप्सुनांकूजतामिवसंयुगे॥ तेषांबाणसहस्रौघैरकीर्णावसुधा
॥ नेबवू॥ अंतरिक्षंवसहसाबाणभूतमभुत्तदा॥ शरांधकारंबहुधाकृतंतत्रसमंततः॥
बमुखायबसंजहेशरैर्मुक्तैर्महात्मभिः॥ तत्रराजंछरैर्मुक्तैर्निर्मुक्तैरिवपंन्नगैः॥ स्वर्ण
पुंखैःप्रकाशद्भिर्व्याप्तास्तादिशस्तया॥ तत्राद्भुतंपरंचक्रेशल्यःशत्रुनिबर्हणः॥ यदेकः
समरेशूरोयोधयामासवैबहून्॥ मद्रराजभुजोत्सृष्टैःकंकबर्हिणवाजिभिः॥ शरैर्वैरिर
कुंताग्रेरवाकीर्यतमेदिनी॥ तत्रशल्यरथंराजन्विचरंतंमहाहवे॥ बपस्याम यथापूर्वे
शक्रस्यासुरसंक्षये ✿॥ ॥इतिमहाभारतेशल्यपर्वणि॥ ॥संजयउवाच॥ ॥ततः
सैन्यास्त्वविजोमद्रराजंपुरस्कृताः॥ पुनरभ्यद्रवन्पार्थान्वेगेनमहतारणेपीडितास्ता
वकासर्वेप्रधावंतोरणोत्कटाः॥ क्षणेनैवपार्थानांबहुत्वात्संसलोडयन्॥ तेवध्यमाना
कुरुभिःपांडवानांवतास्थिरे॥ निवार्यमाणाभीमसेनपस्यतोःकृष्णपार्थयोः॥ ततोध
नंजयःक्रुद्धःकृपंसहपदानुगैः॥ अवाकिरच्छरैर्घोरैःकृतवर्माणमेवच॥ शकुनिंसह
देवंचससैन्यंसमवारयत्॥ नकुलःपार्श्वतःस्थित्वामद्रराजमवैक्षत॥ द्रौपदेयानरेंद्रांश्च
भूयिष्ठान्समवारयत्॥

द्रोणपुत्रं च पांचाल्यः सिखंडी समवारयत् ॥ भीमसेनस्कुरराजानं गदापाणिरवारयत् ॥
शल्यं तु सह सेन्यं तु कुंतीपुत्रो युधिष्ठिरः ॥ ततः सममभवद्युद्धं संसक्तानां ततस्ततः ॥ तावका
नां च परेषां च संग्रामेष्व निवर्तिनां ॥ तत्र पस्य महे कर्म शल्यस्याति महद्रणे ॥ यदेकः सर्व
सैन्यानां पांडवानामयुध्यतः ॥ व्यदृस्संत ततः शल्यो युधिष्ठिर समीपतः ॥ रणे चंद्रमसो
भ्यासे सनैश्चर इव ग्रहः ॥ पीडयित्वा तु राजानं शरैराशीविषोपमैः ॥ अभ्यधावत्पुनर्भीमं श
रवर्षैरवाकिरत् ॥ तस्य तल्लाघवं दृष्ट्वा तथैव च कृतास्त्रतां ॥ अपूजयन्ननीकानि परेषां तावका
नि च ॥ पीड्यमानास्तु शल्येन पांडवा भृशविक्षताः ॥ प्राद्रवंत रणं हित्वा क्रोशमाने युधिष्ठिरे ॥ वध्य
माने स्वनीकेषु मद्रराजेन पांडवः ॥ अमर्षवसमापन्नो धर्मराजो युधिष्ठिरः ॥ ततः पौरुषमा
स्थाय मद्रराजमपीडयत् ॥ जयो वास्तु वधो वेति कृतबुद्धिर्महारथः ॥ समाहूयाब्रवीत्सर्वा
न्भ्रातृन्कृष्णं च बांधवं ॥ भीष्मो द्रोणश्च कर्णश्च ये चान्ये पृथिवीक्षितः ॥ कौरवार्थे परा
क्रांताः संग्रामे निधनं गताः ॥ यथाभागं यथोत्साहं भवंतः कृतपौरुषः ॥ भागोवशिष्ट एकोयं मम शल्यो
महारथः ॥ सोहमद्य युधा जेतुमाशंसे मद्रकेश्वरं ॥ तत्र यन्मानसं मह्यं तत्सर्वं निगतोमि वः ॥ चक्र दा
रक्षाविमौ शूरौ मम माद्रवतीसुतौ ॥ अजेयौ वासवेनापि समरे विरसंमतौ ॥ साध्विमं मातुलं युद्धे
क्षत्रधर्मपुरस्कृतौ ॥ मदर्थं प्रतियुद्ध्येतां मानार्थौ मम सत्वरौ ॥ मां वा शल्यो रणे हंता तं वाहं भद्र
मस्तु वः ॥ इति सत्यामिमां वाणीं लोकवीरा निबोधत ॥ योत्स्येहं मातुलेनाद्य क्षत्रधर्मेण पार्थिवाः ॥
शल्यं समभिसंधाय विजयायेतराय वा ॥ तस्य मेभ्यधिकं शस्त्रं सर्वोपकरणानि च ॥ संयुंजंतु रणे क्षिप्रं
यथावैद्य पा यकैः ॥

शैनेयोदक्षिणंचक्रंधृष्टद्युम्नस्तथोत्तरं ॥ पृष्ठगोपोभवत्तस्यममपार्थोधनंजयः ॥
पुरःसरोममभ्रातास्कंभीमःशस्त्रभृतांवरः ॥ एवमभ्यधिकःस्यात्याद्भविष्यामोमहा
मृधे ॥ एवमुक्तास्ततोहृष्टाश्चक्रुःसर्वेराजप्रियैषिणः ॥ ततःशंखांश्चभेरीश्चशतशश्चैवपुष्क
लान् ॥ अवादयंतपंचालाःसिंहनादांश्चनेदिरे ॥ तेभ्यधावंतसंग्रामेधर्मराजस्यपु
त्रसेनात् ॥ ततःशंखाश्चभेरिश्चनादेनकुरुपुंगवाः ॥ शब्देनगजघंटानांशंखानांनिः
स्वनेनच ॥ तूर्यशब्देनमहतानादयंतश्चमेदिनीं ॥ तान्प्रत्यगृन्हात्सुचानेमत्स्यराजश्च
वीर्यवान् ॥ संग्रामेचाभिवृद्धेनशोणवसोदयाकौ ॥ शल्यस्कंसमूस्थगावीध
र्मराजंमरिंदमं ॥ ववर्षशर २ वर्षेणवर्षेणमघवानिव ॥ तथैवकुरुराजोपिप्रगृह्य
रुचिरंधनुः ॥ द्रोणोपदेशान्विविधान्दर्शयानोमहामनाः ॥ ववर्षशरवर्षाणि
चित्रंलघुचसुष्ठुच ॥ नचास्यविवरंकश्चिद्ददर्शरतोरणे ॥ तावुभौविविधैर्बाणैः
स्ततक्षातेपरस्परं ॥ शार्दूलावामिषप्रेप्सूपराक्रांतावि वाहवे ॥ भीमस्तुतवपुत्रेण
रणशौंडेनसंगतः ॥ पांचाल्यःसात्यकिश्चैवमाद्रीपुत्रौचपांडवौ ॥ शकुनिप्रमुखा
न्वीरान्प्रगृन्हन्समंततः ॥ तदाशीत्तुमुलंयुद्धंपुनरेवजयैषिणां ॥ तावकानांपरे
षांचराजन्दुर्मंत्रितेतव ॥ दुर्योधनोथभीमस्यशरेणानतपर्वणा ॥ चिछेदादिश्यसं
ग्रामेध्वजंहेमविभूषितं ॥ सकिंकिणीकजालेनमहताचारुदर्शिनः ॥ पपातरु
चिरंसंख्येभी

शल्य°

मेसेनस्यमानद ॥ पुनश्चापि धनुश्चित्रं गजराजकरोपमं ॥ क्षुरेणाच्छित घोरेण कृतवर्मा
॥२६ नराधिपः ॥ सच्छिन्नधन्वा तेजस्वी रथशक्त्यास्कृतं तव ॥ विभेदस्तु रसि विक्रम्य सरथोपस्थ
बाविशत् ॥ तस्मिन्मोहमनुप्राप्ते पुनरेव वृकोदरः ॥ यंतुरस्य सिरः कायात् क्षुरप्रेणा
हरस्तदा ॥ हतसूतात् हयास्तस्य रथमादाय जारत ॥ व्यद्रवंत रणे राजन् महाहाकारस्त
तोभवत् ॥ तमभ्यधात्कौरवाणांस्वस्त्राचार्यमहारथः ॥ कृपश्च कृतवर्मा च पुत्रं तव प
रीप्सवः ॥ तस्मिन् विलुलिते सैन्ये त्रस्तास्तस्य पदानुगाः ॥ कोंडीवधन्वा विस्फार्य
धनुस्तानहनत्पार्थ रेः ॥ पुरामहामदुर्दृशापचारोषदृदस्यातवत् ॥ विकृत्ताक्षस्य कौंतेयो
वेपमानस्य मन्युना ॥ विच्छेद्योधान्निषितैर्भल्लैः शतसहस्रशः ॥ सायांपमदियासेनां
ज्येष्ठः श्रेष्ठः सपांडवः ॥ शरैरपातयद्राजन् गिरीन्वज्रैरिवोत्तमैः ॥ साश्वसूतध्वज
रथान्रथिनः पातयन्बहून् ॥ आक्रीडयो बलवान् प्लवगस्त्वापदानिव ॥ साश्वारोहां
श्च तुरगानुत्पत्तिश्चैव सहस्रशः ॥ व्यपायपतत्संग्रामे क्रुद्धोरुद्रः पशूनिव ॥ शून्यमायोधनं
कृत्वा शरवर्षैः समंततः ॥ अभ्यद्रवत् मद्रेशं तिष्ठ शल्येति चाब्रवीत् ॥ तस्य तेच्चरितं दृष्ट्वा
संग्रामे भीमकर्मणः ॥ वित्रेसुस्तावकाः सर्वे शल्यस्त्वेनं समभ्ययात् ॥ ततस्तौ भृशसंरब्धौ
प्रध्माप्य सलिलौ द्रुवौ ॥ समाहूय तदान्योन्यं अभिसंयुतौ समीयतुः ॥ शल्यस्तु शरव ॥२६॥
र्षैर्वायुधिष्ठिरसमाकिरत् ॥ मद्रराजं तु कौंतेयः शरवर्षैरवाकिरत् ॥ व्यदृश्येतां तदा राजन्
कंकपत्रिभिराहवे ॥ रुद्धिन्नरुधिरौ शूरौ मद्रराजयुधिष्ठिरौ ॥ पुष्पिताविव

रेजाते वने शाल्मलिकिंशुकौ ॥ दीप्यमानौ महात्मानौ नेदतुर्युद्धदुर्मदौ ॥ दृष्ट्वा सेन्यस्य
माषेत ममसंग तस्त्रायेर्जुनं ॥ ततो मद्राधिपं पार्थो मोक्ष्यतस्वसंधरां ॥ शल्यो पांडवहत्ताद
धर्युयोधिनमयगां ॥ इति वतिश्च योनाम योधानां तव भारत ॥ प्रदक्षिणमभूत्सर्वं धर्मराज
स्य युध्यतः ॥ ततः शरशतं ज्योग्रं मुमोचाग्र्यं युधिष्ठिरे ॥ धनुश्चास्य शितधारेण बा
णेन निकृंतत ॥ सोन्यत्कार्मुकमादाय शल्यं शरशतैस्त्रिभिः ॥ अविध्यत्कार्मुकं चास्य
क्षुरेण निरकृंतत ॥ अथास्य निजघानाश्वांश्चतुरो नतपर्वभिः ॥ द्वाभ्यामति शि
ताग्राभ्यामुभौ च पार्ष्णिसारथी ॥ ततोस्य दीप्यमानेन पीतेन निशितेन च ॥ प्रमुखे वर्तमान
स्य भल्लेनापहरद्ध्वजं ॥ ततः प्रभग्नं तत्सैन्यं दुर्योधनमरिंदम ॥ ततो मद्राधिपं द्रोणिरभ्य
वेत ददृतं ॥ आरोप्य स्वरथे चैनं त्वरमाणः प्रदुद्रुवे ॥ मुहूर्तमिव तौ गत्वा नर्दमानं
युधिष्ठिरे ॥ स्थित्वा ततो मद्रपतिरन्यं स्यंदनमास्थितः ॥ विधिवत्कल्पितं दिव्यंम
हाबुदनिनादितं ॥ सज्जयंत्रोपकरणं द्विषतां लोमहर्षणं ॥ ❀ ॥ ॥ इति महाभारते श
ल्यपर्वणि ॥ ॥ संजय उवाच ॥ ॥ अथान्यद्धनुरादाय बलवद्वेगवत्तरं ॥ युधिष्ठिरं मद्र
पतिर्विद्ध्वा सिंह इवानदन्‌ ॥ ततः स शरवर्षेण पर्जन्य इव वृष्टिमान्‌ ॥ अभ्यवर्षदम
यत्मा क्षत्रियान्क्षत्रियर्षभिः ॥ सात्यकिं दशभिर्विद्ध्वा भीमसेनं त्रिभिस्तथा ॥ सहदेवं त्रि
भिर्विद्ध्वा युधिष्ठिरमपीडयत्‌ ॥ तांस्तानन्यान्म

शल्य० हेष्वासान्साश्वान्सरथकुंजरान् ।। अर्दयामास विशिखैः सल्कागिरिवकुंजरं ।। कुं
॥२७॥ जरान्कुंजरारोहान्स्वानश्वप्रयायिनः ।। रथांश्च रथिभिः सार्द्धं जघान रथिनांवरः ।।
वाहूंश्चिच्छेदच तथा सायुधान्कतनान्विवा ।। चकार वैमहायोधैस्तीर्णां विदीं कुशैरिव ।।
तथांतमरिशैन्यानिव्रंतं मस्कजिवांतकं ।। परिवुभृशंक्रुद्धाः पांडुपांचालसैनिका ।।
तंभीमसेनश्चशिनेश्चनप्तामाद्राश्चपुत्रौपुरुषप्रवीरौ ।। समागतौभीमवलेनराजा पय
समन्योन्यमाहुर्जिद्रवंतः ।। ततस्तुशूरास्समरेनरेंद्रमहेश्वरंप्राप्ययुधायुधिष्ठिरं ।। नि
वार्यसैन्यंसमरेतुवीरं जघ्नुःशरैःपत्रिभिःतुग्रवेगैः ।। संरक्षितो भीमबलेनराजा माद्री
सुताभ्याममथमाधवेन ।। मद्राधिपं पत्रिभिरुग्रवेगैस्तानांतरे धर्मसुतो निजघ्ने ।। ततोर
थौतावकानांरथयैष्याः समीक्ष मद्राधिपतिंशरार्त्तं ।। र्यविव्रुःप्रवरासर्वशास्त्रदुर्योधनस्या
नुमतासमंतात् ।। ततोद्रुतंमद्रजनाधिपोरणे युधिष्ठिरसप्तभिरभ्यविध्यत ।। तंचापि
पार्थोनवभिःपृषत्कैर्विव्याधराजंस्तुमुखेमहात्मा ।। आकर्णपूर्णायतसंप्रयुक्तैःशरै
स्तथासंप्रधितैर्वधौतैः ।। अन्योन्यमाच्छादयतांमहारथौ मद्राधिपश्चापियुधिष्ठिरश्च
ततस्तुसमरेमहारथौ परस्परस्यांतरमीक्षमाणौ शरैःनिधातुंनृपोत्तमौतदा ॥
महाबलौशत्रुभिरप्रधृष्यौ तयोर्धनुर्ज्यातलनिस्वनोमहान्महेंद्रवज्राशनितुल्य ॥२७॥
निस्वनः ।। परस्परेबाणगणौमहात्मनोःप्रवर्षितौमद्रपपांडुवीरयोः ।। तौचेरतुव्याघ्र
शिशुप्रकाशौमहावनेष्वा मिषगृद्धिनाविव

विशाणिनौ नागवराविवोभौ तक्षतुः संयुगजातविहर्षौ॥ ततस्तुमद्राधिपतिर्महात्मा
युधिष्ठिरंभीमबलंपृषत्कैः॥ विव्याधवीरंहृदयेतिवेगंशरेणसूर्याग्निसमप्रभेण॥ ततोतिवि
द्धोति युधिष्ठिरःस्तोत्त सुसंप्रयुक्तेन शरेणराजन्॥ जघानमद्राधिपतिंमहात्मा मुदंचलेभेऋषभः
कुरूणां॥ ततोमुहूर्त्ता दिवपार्थिवेंद्रोलब्धासंज्ञांक्रोधसंरक्तनेत्रः॥ शरेणपार्थं त्वरितोजघा
नसहस्रनेत्रःप्रतिमप्रभावः॥ त्वरंस्ततोधर्मसुतोमहात्माशल्यस्यक्रुद्धोनवभिःपृशत्कैः॥
भित्वाह्युरस्कतपवीयवर्मजघानशड्भिस्त्वसितैःपृशत्कैः॥ ततस्तुमद्राधिपतिःप्रहृष्टोधनु
र्विकृष्याप्रसृजन्तपषत्कान्॥ द्वाभ्यांक्षुराभ्यांचतथैवराज्ञःश्चिच्छेदचापंकुरु॰पुंगवस्य॥
नवंततोन्यत्समरेप्रगृह्यराजाधनुर्घोरतरंमाहात्मा॥ शल्यंहिविव्याधशरैःसमंताद्यथा
महेंद्रोनमुचिंशितोग्रैः॥ ततस्तुशल्योनवभिःपृशत्कैः भीमस्यराज्ञश्च युधिष्ठिरस्य॥ निकृत्य
पाकोपटुवर्मणीतयोर्विदास्यामासभु महात्मा॥ ततोपरेणाज्वलनार्कतेजसाक्षुरेणरा
ज्ञोधनुरुन्ममाथ॥ कृपश्चतस्यैवजघानसूतंशड्भिःशरैःसोविमुखंपपात॥ मद्राधिप
श्चापियुधिष्ठिरस्यशरैश्चतुर्भिर्निजघानवाहान्॥ वाहांश्चहत्वाव्यकरोन्महात्मायोधक्ष
यंधर्मसुतस्यराज्ञः॥ तथाकृतेराजनिभीमसेनोमद्राधिपस्याशुततोमहात्मा॥ छित्वाधनु
र्वेगवताशरेणद्वाभ्यामविध्यत्सुदृढंनरेंद्रं॥ अथापरेणास्यजहारयंतुःकायाच्छिरःसन्न
हनाजिमध्यात्॥ जघानचाश्वांश्चतुरःसुषिघ्रांस्तथाभृशंकुपितोभीमसेनः॥ तमग्र
णीःसर्वधनुर्धराणामेकंवरंतंसमरेतिवेगं॥ माद्रीपुत्रःसहदेवस्तथैवतैःसायकैःमोहितंविश
शल्यं॥

भीमंशरैस्यचकर्तवर्मस भीमसेनेन।निकृत्तवर्मा॥युधिष्ठिरंभीमवलोभ्यधावकूतंचा
पिराजानमध्योमतंनं॥क्रुद्धं पप्यैवातकमापतंतंधृष्टकेम्राद्रौपदेदेयःशिखंडिसिनेश्चन
प्तापरसि समंगाकू॥वधोविक्रवर्मापुतिमन्यकृतंभीमोमाहात्मादशभिःपृषत्कैः।एवं
चमल्लुन्नवकरमुष्योनदन्पृहृष्टस्तावसैन्यमध्ये॥तत्कर्मभीमस्यसमीक्षदृष्ट्वासापांडवानां
प्रवरारथेयोधाः॥नादंप्रचक्रुःभृशमुत्खसंतःशंखांश्चदध्मुःशशिसन्निकाशान्॥तेनाप्य
शब्देनविभीषणेनतवाभिगुप्तंवलमुत्कंपंचः॥वधाभिभूतंतुधिरोक्षिताग्नंविसंज्ञकल्पंच
तथाविसीर्णं॥समद्रराजःसहसाभिकीर्णोभीमाग्रगैःपांडवयोधमुख्यैः॥युधिष्ठिरस्या
पभिमुखंजवेनसिंहोयथामृगहेतोःप्रयातः॥सधर्मराजोनिहताश्वसूतःक्रोधेनदीप्तज्व
लनप्रकाशः॥दृष्ट्वातुमद्राधिपतिंसतूर्णंसमभ्यधावत्तमरिंवलेन॥गोविंदवाक्यत्वरि
तोविविंसद्ध्रेमतिंशल्यविनाशनाय॥सधर्मराजोभिहतासूतेवरयुधितिष्ठन्शक्तिमेवा
नुकांक्षन्॥तत्रापिशल्यस्यनिशम्यकर्ममहात्मनोभागमथावशिष्टं॥स्मृत्वामनःशल्य
वधेयतात्मायथोक्तमिंद्रावरजस्यवाक्यं॥सधर्मराजोमणिहेमदंडांजग्राहशक्तिंकनक
प्रकाशां॥नेत्रेचदीप्तेसहसाविवृत्यमद्राधिपंक्रुद्धमनानिरीक्षन्॥निरीक्षितोवैनरदेवराज्ञा
पूतात्मनानिर्गतकल्मषेण॥ननस्करशक्तिंरुचिरोग्रदंडांमणिप्रवालोज्वलितांसुदीप्तां॥
विक्षेपवेगात्सभृशंमहात्मामद्राधिपायप्रवरःकुरूणां॥दीप्तामथैनांमहताबलेनस ॥२०५
विस्फुल्लिंगांसहसापतंतीं॥प्रेक्षंतुसर्वेकुरवःसमेतादिवायुगांतेमहतीमिवोल्कां॥

ताकालरात्रीमिव पाशहस्ता यमस्य धात्रीमिव घोररूपां ॥ सब्रह्मदंडप्रतिमाममोघां सं
सर्जयत्तां युधि धर्मराजः ॥ गंधस्रगग्र्यासनयानभोजनै रभ्यर्चितां पांडुसुतैः प्रयत्नात् ॥ संवर्त
काग्निप्रतिमां ज्वलंतीं कृत्यामथर्वांगिरसीमिवोग्रां ॥ ईशानहेतोः प्रतिमितां तां तक्षा रिपू
णामसृग्देहमक्षां ॥ भूम्यंतरिक्षस्थजलाशयानि प्रसह्य भूतानि निहंतुमीशां ॥ घंटापताका
मणिवज्रमुक्तावैदूर्यचित्रां जपनीयदंडां ॥ त्वष्ट्रा प्रयत्नान्नियमेन कृत्वां ब्रह्मद्विषामंतकरीम
मोघां ॥ बलप्रयत्नादधिकूटवेगां मंत्रैश्च घोरै रभिमंत्र्य यत्नात् ॥ सपर्यमार्गेण च तां परेण व
धाय मद्राधिपतेस्तदानीं ॥ हतोसि पापेत्यभिकृष्यमानो रुद्रोंधकायांतकरं यथेषुं ॥ प्रसा
र्य बाहुं सुदृढं सुपाणिं क्रोधेन नृत्यन्निव धर्मराजः ॥ तां तु वशक्त्या प्रहितां स्वशक्त्या हि युधिष्ठि
रेण ग्राग्मेयवीर्यां ॥ प्रतिगृहीतां विनर्दशब्दैः समुत्पतंतीमग्निमिवार्यघोरां ॥ साव
न स्य मर्माणि विदार्य शूरमुरो विशालं च यथैव जित्वा ॥ विवेश गां तोयमिवाप्रसक्ता यशो विशा
लं नृपतेर्दहंती ॥ नसाक्षिकर्णास्यविनिःसृतेन प्रस्यंदता च व्रणसंभवेन ॥ संसिक्तगा
त्रो रुधिरेण सोभूत्क्रौंचो यथा स्कंदहतो महाद्रिः ॥ प्रसार्य बाहु प्रपदं नतो गां संछिन्न
वमकुरकुलं दत्तेन ॥ महेंद्रवाहोपमनिर्गतिम वज्राहतेनः शृंगमिवाचलस्य बाहू प्रसार्याभि
मुखो धर्मराजस्य धर्मराट् ॥ ततो निपातितो भूमाविंद्रध्वज विवोच्छ्रितः ॥ सत्य च
छिन्नः सर्वांगो रुधिरेण समुक्षितः ॥ प्रत्युद्गत इव प्रेम्णा भूम्या स नरपुंगवः ॥ प्रियया कांत
या कांतः पतमान इवोरसि ॥ चिरं भुक्त्वा वसुमतीं प्रियां कांतामिव प्रभुः ॥ सर्वैरंगैः समाश्लि
ष्य प्रसुप्त इव सोभवत् ॥ धर्म्ये धर्मात्मना युद्धे निहतो धर्मसूनुना ॥ सम्यग्घुत इवाग्निष्टे

शल्य०

प्रशांतोग्निरिवाध्वरे ॥ शक्त्या विभिन्नहृदयं विप्रमुक्तायुधध्वजं ॥ प्रशांतमपि मद्रेशं लक्ष्मी
र्नैव व्यमुंचत ॥ ततो युधि रश्चापमादायेंद्रसमप्रभं ॥ व्यधमद्विशतं संख्ये गरुत्मानि
पन्नगान् ॥ देहासून्निशितैर्भल्लै रिपूणां नाशयन् क्षणात् ॥ ततः पार्थस्य बाणौघैरावृताः सै
॥२१॥ निकास्तव ॥ निमीलिताक्षाः क्रोशंतो भृशमन्योन्यमर्दिताः ॥ स्यंदंतो रुधिरं देहैर्विशस्त्राय
जीविताः ॥ ततश्शल्ये निपतिते मद्रराजानुजो युवा ॥ भ्रातुः सर्वगुणैस्तुल्यो रथी पांडवमभ्
भ्ययात् ॥ विव्याध नरश्रेष्ठो नाराचैरभित्वरन् ॥ हतस्यापचितिं भ्रातुश्चिकीर्षुर्युद्धदुर्मदः ॥
तं विव्याधाशुगैः षड्भिर्धर्मराजस्त्वरन्निव ॥ कार्मुकं चास्य चिच्छेद क्षुराभ्यां ध्वजमेव च ॥
ततोस्य दीप्यमानेन सुदृढेन सितेन च ॥ प्रमुखे वर्तमानस्य भल्लेनापाहरच्छिरः ॥ सकुं
डलं तद्ददृशे पतमानं शिरो यथा ॥ पुण्यक्षयमिव प्राप्य शरीरं स्वर्गवासिनं ॥ तस्याप्र
कृष्टशीर्षं तच्छरीरं पतितं रथात् ॥ रुधिरेणावसक्तांगं दृष्ट्वा सैन्यमभज्यत ॥ विचि ॥२१॥
कवचे तस्मिन् हते मद्रनृपानुजे ॥ हाहाकारं विकुर्वाणाः कुरवो विप्रदुद्रुवुः ॥ शल्या
नुजं हतं दृष्ट्वा तावकास्त्यक्तजीविकाः ॥ वित्रेसुः पांडवभयाद्रजोध्वस्तास्तथाया
न तां ॥ स्तु भज्यमानांस्त्रस्तान् कौरवान्भरतर्षभ ॥ शिनेर्नप्ता किरान्बाणैरभ्य
वर्तत सात्यकिः ॥ तमायांतं महेष्वासमप्रसह्यं दुरासदं ॥ हार्दिक्यस्त्वरितो राजन् प्रत्
गृह्णाद्विभीतवत् ॥ तौ समेतौ महात्मानौ वार्ष्णेयावपराजितौ ॥ हार्दिक्यं सात्यकिश्चैव
सिंहाविव मदोत्कटौ ॥ इषुभिर्विमलैः प्रासैश्छादयंतौ परस्परं ॥ अर्चीभिरिव सूर्यस्य

दिवाकरसमप्रभो ॥ चापमार्गबलोद्धुतान्मार्गणान्वृष्णिसिंहयोः ॥ आकाशसम
पस्याम पतंगानिव शीघ्रगान् ॥ सात्यकिं दशभिर्विद्धा हयांश्चापि त्रिभिः शरैः ॥ चापमेकेन
चिच्छेद हार्दिक्यो नतपर्वणा ॥ तन्निकृत्तमपास्य सिनिपुंगवः ॥ अन्यदादत्त वेगेन बलवत्तर
मायुधं ॥ तदादाय धनुःश्रेष्ठं वरिष्ठं सर्वधन्विनां ॥ हार्दिक्यं दशभिर्बाणैः सात्यकिः प्रत्यविध्य
त् ॥ ततो रथं युगं शोभांश्चापि छित्वा भल्लैः पपान्निभिः ॥ अश्वांस्तस्यावधीत्तूर्णमुभौ च पार्ष्णिसारथी ॥
मद्रराजे हते राजन्विरथे कृतवर्मणि ॥ दुर्योधनबलं सर्वं पुनरासीत्पराङ्मुखं ॥ तत्परे नाव
बुध्यंत सैन्ये च रजसावृते ॥ बलं तु हतभूयिष्ठं तदासीत्पराङ्मुखं ॥ ततो मुहूर्त्ताच्चापिपस्य
न्रजोभौमं समुपस्थितं ॥ विविधैः शोणितस्रावैः प्रशांतं पुरुषर्षभ ॥ ततो दुर्योधनो दृष्ट्वा भग्नं
स्वबलमंतिकात् ॥ जवेनापततः पार्थानेकः सर्वान्निवारयत् ॥ पांडवान्सरथान्दृष्ट्वा
धृष्टद्युम्नं च पार्षतं ॥ आनर्तकं दुराधर्षं सितैर्बाणैरवाकिरत् ॥ तं परे नाभ्यवर्तंत मर्त्या मृत्यु
मिवागतं ॥ अथान्यं रथमास्थाय हार्दिक्योऽपि न्यवर्तत ॥ ततो युधिष्ठिरो राजा त्वरमाणो म
हारथः ॥ चतुर्भिर्निजघानाश्वान्यत्रिभिः कृतवर्मणः ॥ विव्याध गौतमं चापि षड्भिर्गार्ध्रैः सु
तेजनैः ॥ अश्वस्थामा ततो राज्ञा हताश्वं विरथीकृतं ॥ तमपोवाह हार्दिक्यं स्वरथेन युधि
ष्ठिरात् ॥ ततो वीरधृजोऽष्टाभिः प्रत्यविध्य युधिष्ठिरं ॥ विव्याधरीं च निशितैस्सायकाष्टाभिः
शिलीमुखैः ॥ एवमेतन्महाराज युद्धं ते समवर्त्तत ॥ तव दुर्मंत्रिते राजन्सहपुत्रस्य भारत ॥
तस्मिन्महेष्वासवरे विशस्तो संग्राममध्ये कुरुपुंगवेन ॥ पार्थाः समेताः परमप्रहृष्टाः शंखान्

॥ शल्य०

॥ ३० ॥

दध्मुर्हतवीक्ष्यशाल्यं ॥ युधिष्ठिरस्तु प्रशशंस राजो पुरा सुरा वृत्तवधे यथेंद्रं ॥ चक्रुश्च नाना
विधवाद्यशब्दान् विनादयंतो वसुधां समंतात् ॥ ❀ ॥ ॥ इति महाभारते शल्यपर्वणि शल्य
वधः ॥ ॥ संजय उवाच ॥ ॥ शल्ये तु निहते राजन् मद्रराजपदानुगाः ॥ रथाः सप्तशता वीराः
दुर्योधनस्फाद्विरदमारुह्याचलसंन्निभं ॥ छत्रेण ध्रियमानेन वीज्यमानश्च चामरैः ॥
नगंतव्यं नगंतव्यमितिमद्रान्वारयत् ॥ दुर्योधनेन ते वीराः वार्यमाणा पुनः पुनः ॥ युधि
ष्ठिरं जिघांसंतः पांडूनां प्राविशन्बलं ॥ तत्र शूरा महाराज कृताचित्ताः सुयोधने ॥ धनुः
शब्दं महत्कृत्वा सहा युध्यंत पांडवैः ॥ श्रुत्वा विनिहतं शल्यं धर्मपुत्रेण वैष्टिते ॥ मद्रराजजं
याशले मद्रकानां महारथैः ॥ आजगाम ततः पार्थो गांडीवं विक्षिपन् धनुः ॥ पूरयन्नथ घो
षेण दिशः सर्वा महारथः ॥ ततोर्जुनस्य भीमश्च माद्रीपुत्रौ च पांडवौ ॥ सात्यकिश्च नरव्या
घ्रौ द्रौपदेयाश्च सर्वशः ॥ धृष्टद्युम्नः शिखंडी च पांचालाः सह सोमकैः ॥ युधिष्ठिरं परीप्संतः
समंतात्पर्यवारयन् ॥ ते समंतात्परिवृताः पांडवाः पुरुषर्षभ ॥ क्षोभयंतिस्म सेनां ते मकराः सागरं यथा ॥
वृक्षानिव महावाताः कंपयंतिस्म तावकान् ॥ पुरोवातेनांविकेयं क्षोभमानान्महानदी ॥ व्यक्षो
भ्यव्येत दाराजन्पांडनाव निपुंगवाः ॥ प्रस्कंद्य सेनां महतीमहात्मानो महारथाः ॥ प्रचुक्रुशुःसात्र
तत्र क्वस सराय युधिष्ठिरः ॥ भ्रातरः पांडवाः शूरा दृश्यंते नेह केचन ॥ पंचालाश्च महावीर्याः शिखंडी च
महारथः ॥ धृष्टद्युम्नोथ सैनेयो द्रौपदेयाम्महारथाः ॥ एवं तान्वादिनः शूरान्द्रौपदेयाश्च सर्वशः ॥
अभ्यघ्नन्युयुधानश्च मद्रराजपदानुगान् ॥ रथैश्च पतितैकेचि

॥ ३० ॥

छिन्नैर्महध्वजैः प्रसदृश्यंत समरे तावकाः निहताः परैः॥ आलोक्य पांडवान्युद्धे योधा
न्राजन्समंततः॥ वार्यमाणा युयुर्वीरास्तव पुत्रेण भारत॥ दुर्योधनस्ततान्वीरान्वारयामा
ससांत्वयन्॥ नचास्य सासनं कश्चित्तत्र चक्रे महारथाः॥ ततो गांधारराजस्य पुत्रः सकुनिरब्रवीत्॥
दुर्योधनं महाराज वचनं वचनक्षमः॥ किं नः प्रेक्षमाणानां मद्राणां हन्यते बलं॥ न युक्तमेसमरे
त्वयि तिष्ठति भारत॥ सहितैर्नाम योद्धव्यमित्येवं समय कृतः॥ अथ कस्मात्परानेवं निघ्नतो मर्श
से नृप॥ ॥दुर्योधन उ०॥ ॥वार्यमाणा मया पूर्वं नैव चक्रुर्वचो मम॥ एते हि सहितास्सर्वे प्रस्क
न्ना पांडुवाहिनीं॥ ॥शकुनिरुवाच॥ ॥न भर्तुः शासनं वीरा रणे कुर्वंत्यमर्षिताः॥ अलं क्रोद्धुं तथै
तेषां नायं कालमुपेक्षितुं॥ यामः सर्वेत्र संभूय सवाजिरथकुंजराः॥ परित्रातुं महेष्वासान्मद्ररा
जपदानुगान्॥ अन्योन्यं परिरक्षामो यत्नेन महता नृप॥ एवं सर्वेनुसंचिंत्य प्रययुर्यत्र सैनिकाः॥
एवमुक्तस्ततो राजा बलेन महता वृतः॥ प्रययौ सिंहनादेन कंपयन्निव वसुंधरां॥ हत विध्यत गृ
ह्णीत प्रहरध्वं निकृंतत॥ इत्यासीत्तुमुलः शब्दस्तव सैन्यस्य भारत॥ पांडवास्तु रणे दृष्ट्वा मद्र
राजपदानुगान्॥ सहितानभ्यवर्तंत गुल्ममास्थाय मध्यमं॥ ते सु मुहूर्ताद्रणे वीरा हस्ता
हस्तिं विशांपते॥ निहताः प्रत्यदृश्यंत मद्रराजपदानुगाः॥ ततो नः संप्रयातानां हतमित्रास्त
रस्विनः॥ हृष्टाः किलकिलाशब्दमकुर्वन्सहिताः परैः॥ अथोत्थितानि रुंडानि समदृश्यंत सर्व
शः॥ पपात महती चोल्का मध्ये वादित्यमंडलान्॥ रथैर्भग्नैर्युगाक्षैश्च निहतैश्च महारथैः॥
अश्वैर्निपतितैश्चैव संछन्नाभूद्वसुंधरा॥ वातायमाणैस्तुरगैर्युगासक्तैस्ततः ॥अदृश्यंत

शल्य० महाराज योधास्तत्र रथाजिरे॥ भग्नचक्रान्रथान्केचिद्धतसूरगत्रपो॥ रथार्धं केदिदा
दाय दिशो दृशाविव प्रभुः॥ तत्र तत्र च दृश्यंते योधाः क्लिष्टाः स्म राजिनः॥ रथिनः पतमाना
व्यदृश्यंत नृपोत्तम॥ गगनात्प्रच्युता सिद्धाः पुण्यानामिव संक्षये॥ निहतेषु च शूरेषु मद्र
राजानुगेषु॥ अस्मानापततश्चैव दृष्ट्वा पार्थमहारथाः॥ अभ्यवर्तंत वेगेन जयगृद्धाः
॥३१॥ प्रहारिणः॥ बाणान्रासिंचिरवान्कृत्वा विमिश्रान्शंखनिस्वनैः॥ अस्मांस्तु पुनरासाद्य
लब्धलक्षाः प्रहारिणः॥ बाणान्सदरवान्कृत्वा सिंहनादं प्रचुक्रुशुः॥ ततो हतमभिप्रेक्ष्य
मद्रराजबलं महत्॥ मद्रराजं च समरे दृष्ट्वा शूरं निपातितं॥ दुर्योधनबलं सर्वं पुनरासी
त्पराङ्मुखं॥ वध्यमानं महाराज पांडवैर्जितकाशिभिः॥ दिशो भेजे तु संभ्रांतं त्रासितं
दृढधन्विभिः॥ ॥ ॥इति महाभारते शल्यपर्वणि॥ ॥संजय उ०॥ ॥पतिते तु युधि
दुर्धर्षे मद्रराजे महारथे॥ तावकाः सूतपुत्राश्च प्रायसो मुखाभवन्॥ वणिजो नावि
भिन्नायां यथागाधे न च प्लुवे॥ अपारे पारमिच्छंतो हते शूरे महात्मनि॥ मद्रराजे मह ॥३१५॥
राज वित्रस्ताः शरविक्षिताः॥ अनाथा नाथमिच्छंतो मृगाः सिंहार्दिता इव॥ वृषा यथा
भग्नशृंगाः शीर्णदंता गजा इव॥ मध्याह्ने प्रत्ययायाम निर्जिता अजातशत्रुणा॥ न संधातु
मनीकानि तव राजन्पराक्रमे॥ आसीद्बुद्धिर्हते शल्ये तव योधस्य कस्यचित्॥ भीष्मे द्रो
णे च निहते सूतपुत्रे च भारत॥ न च दुःखं तव योधानां भयं चासीद्विशांपते॥ यद्भयं य

ञ्चनःशोकोभूयइवाभ्यवर्धत॥ निराशाश्च येतस्मिन्हतेशल्येमहारथे॥ हतप्रवीरा
विध्वंस्तानिकृत्ताश्चशितैःशरैः॥ मद्रराजेहतेराजनूयोधास्तेप्राद्रवनूभयात्॥ अश्वानन्येग
जानन्येमहारथाः॥ आरुह्यजवसंपन्नाःपदाताःप्राद्रवन्भयात्॥ द्विसाहस्राश्चमातंगागि
रिरूपाप्रकारिपाः॥ संप्राद्रवन्हतेशल्येअंगुष्ठांगुष्ठचोदिताः॥ तेरणाद्भरतश्रेष्ठतावकाः
प्राद्रवनूदिशः॥ धावंतश्चाप्यदृश्यंतश्वसमानाःशराहताः॥ तान्प्रभग्नान्हतान्दृष्ट्वाहतोत्स
हान्पराजितान्॥ अभ्यद्रवंतपांचालाःपांडवाश्चजयैषिणः॥ बाणशब्दरवाश्चापिसिंहनादा
श्चपुष्कलाः॥ शंखनादश्चशूराणांदारुणःसमपद्यत॥ दृष्ट्वातुकौरवंसैन्यंभयत्रस्तंप्रवि
द्रुतं॥ अन्योन्यंसमभाषंतपांचालाःपांडवैःसह॥ अद्यराजासत्यधृतिर्जितामित्रोयुधिष्ठिरः॥
अद्यदुर्योधनोराजादमापानपरिस्वय॥ अद्यश्रुत्वाहतंपुत्रंधृतराष्ट्रोजनेश्वरः॥ विह्वलःपति
तोभूमौकिल्बिषंप्रतिपद्यतां॥ अद्यराजास्तुकौंतेयंसमर्थंसर्वधन्विनं॥ अद्यात्मानंचदुर्मेधा
गर्हयिष्यतिपापकृत्॥ अद्यक्षत्तुर्वचःसत्यंसंस्मरंताब्रुवतोहितं॥ अद्यप्रभृतिपार्थांश्चप्रेष्यभूतो
उपाचरेत्॥ विजानातुनृपोदुःखंयत्प्राप्तंपांडुनंदनैः॥ अद्यकृष्णस्यमाहात्म्यंजानातुसमहीपतिः॥
अद्यार्जुनधनुर्घोषंघोरंजानातुसंयुगे॥ अस्त्राणांचबलंसर्वंबाह्वोश्चबलमाहवे॥ अद्यज्ञास्य
तिभीमस्यबलंघोरंमहात्मनः॥ हतेदुर्योधनेयुद्धेशक्रेणेवासुरेरणे॥ यत्कृतंभीमसेनेनदुःशास
नवधेतदा॥ नान्यःकर्तास्तिलोकेवैऋतेभीमंमहाबलं॥ जानीतामद्यज्येष्ठस्यपांडवस्यपराक्रमं॥
मद्रराजहतंश्रुत्वादेवैरपिदुरासदं॥ अद्यज्ञास्यतिसंग्राममाद्रीपुत्रौचपांडवौ॥ सिखंडिचमहेस्वासो
राजाचैवयुधिष्ठिरः॥ येषांजयग

तोनाथो नाथः कृष्णजनार्दनः॥कथं तेषां जयो न स्याधेषां धर्मो व्यपाश्रयः॥भीष्मद्रोणं च कर्णं च
मद्राजानमेव च॥अन्यान्यान्नृपतीन्सर्वान्शूरान्शोभसहस्रशः॥कोन्यः शक्तो रणे जेतु मृते पार्थ
युधिष्ठिरं॥यस्य नाथो हृषीकेशः सदधर्मजयानिधिः॥इत्येवं वदमानस्य हर्षेण महतावृताः॥पु
णुदं स्त्रावकान्युद्धे संजयाः पृष्टतोन्ययुः॥धनंजयो रथानीकं मध्ये वर्तति वीर्यवान्॥सौबलीपुत्रैस्त्व शकुनि
सात्यकिश्च महारथः॥तान्प्रेक्ष्य द्रवतः सर्वान्भीमसेनभयार्दितान्॥दुर्योधनस्तदा सूतमब्रवीत्
विस्मयन्निव॥मामतिक्रमते पार्थो धनुष्पाणिरवस्थितः॥जघने सर्वसैन्यानां ममास्वान्प्रतीचो
दय॥जघने वर्तमानं हि कौंतेयो मां धनंजयः॥नोत्सहेतास विक्रांतुं वेलामिव महोदधिः॥पस्य सैन्यं
महत्सूत पांडवैः समभिद्रुतं॥सैन्यरेणुं समुद्भूतं पस्य सैन्यं समंततः॥सिंहनादांश्च बहुषः शृणु
घोरान्महाजयान्॥तस्माद्याहि शनैः सूत जघनं परिपालयन्॥मयि स्थिते त्व समरे युध्यमाने च
पांडवं॥पुनरावर्तति सूत मामकं वलमोजसा॥तच्छ्रुत्वा तव पुत्रस्य सूरस्य सदृशं वचः॥सारथिर्हेम
संछन्नांश्चैरस्वांनचोदयत्॥गजस्वरथिभिर्हीनास्तत्कालानः पदातयः॥एकविंशतिसाहस्राः
संयुगायावतस्थिरे॥नानादेशसमुद्भूता नानानगरवासिनः॥अवस्थितास्तदा योधा प्रार्थयंतो म
हद्यशः॥तेषामापततां तत्र संहृष्टानां परस्परं॥संमर्दः सुमहान्यसे घोररूपो भयानकः॥भीम
सेनस्तदा राजन्धृष्टद्युम्नश्च पार्षतः॥बलेन चतुरंगेण नानादेशान्यवारयन्॥भीमसेनाभ्यवर्तंत
रणेन्यानुपदातयः॥प्रक्ष्वेड्यास्फोटसंहृष्टा वीरलोके यियासवः॥व्यासाद्य भीमसेनं तु संरब्धा युद्ध ॥३२॥
दुर्मदाः॥धार्तराष्ट्रा विनर्द्दिहि नान्यांस्त्वाकथयय हयां॥परिवार्य रणे भीमं निजघ्नुस्ते समंततः॥स वध्य
मानः समरे पदातिगणसंवृतः॥न च चाल

ततस्तु नान्मे नाकः स्वपर्वतः॥ ते तु क्रुद्धा महाराज पांडवानां महारथं॥ निगृह्णीतुं प्रचक्रुर्हि
योधांस्त्वान्यानवारयत्॥ सुक्रुद्धगरणे भीमसेनो रथे पर्युपस्थिते॥ सोवतीर्य रथात्तूर्णं पदा
तिं समुपस्थितः॥ जातरूपपरिछन्नां प्रगृह्य महतीं गदां॥ अवधीत्तावकान्योधान्दंड
पाणिरिवांतकः॥ रथाश्वद्विपहीनांस्तु तानृसिमो गदयावली॥ एकविंशतिसाहस्रान्नृप
दातीन्विनिपपोथयत्॥ हत्वा तत्पुरुषानीकं भीमः सत्यपराक्रमः॥ धृष्टद्युम्नं पुरस्कृत्य नचि
रात्प्रत्यदृश्यत॥ पादाता निहता भूमौ शिश्यिरे रुधिरोक्षिताः॥ संभग्ना इव वातेन कर्णि
काराः सुपुष्पिताः॥ नानायुद्धास्त्रजोपेता नानाकुंडलधारिणः॥ नानाजात्या हतास्तत्र ना
नादेशसमागताः॥ पताकध्वजसंछन्नं पदातीनां महद्बलं॥ निकृत्तं विबभौ रौद्रं घोररूपं
भयानकं॥ युधिष्ठिरपुरोगास्तु सर्वसैन्यमहारथाः॥ अभ्यधावन्महात्मानं पुत्रं दुर्योधनं
तव॥ ते सर्वे तावकान्दृष्ट्वा महेष्वासान्परामुखान्॥ नाभ्यवर्तंत ते पुत्रं वेलेव मकरालयं॥
तदद्भुतमपस्याम तव पुत्रस्य पौरुषं॥ यदेकं सहिताः पार्था न शेकुरतिवर्तितुं॥ नातिदूरां प
यातं तु कृतबुद्धिं पलायने॥ दुर्योधनं स्वकं सैन्यमब्रवीद्भृशविक्षतं॥ न तं देशं प्रपस्यामि पृथि
व्यां पर्वतेषु च॥ यत्र याताञ्च वो हन्युः पांडवाः किं सृतेन वः॥ अल्पं च बलमेतेषां कृष्णौ च
भृशविक्षितौ॥ यदि सर्वत्र तिष्ठामो ध्रुवं नो विजयो भवेत्॥ विप्रयातांस्तु वो भिन्नान्पांडवाः कृत
किल्बिषाः॥ अनुसृत्य हनिष्यंति श्रेयो नः समरे स्थितं॥ शृणुध्वं क्षत्रियाः सर्वे यावंतोत्र
समागताः॥ यदा शूरं च भीरुं च मारयत्यंतकः सदा॥ को मूढो न युध्येत पुरुषः क्षत्रियब्रुवः॥

शल्य० म्रेयो नो भीमसेनस्य क्रुद्धस्य प्रमुखे स्थितं ॥ सुखः सांग्रामिको मर्त्यः क्षत्रधर्मेण युध्यतां ॥
जित्वेह सुखमाप्नोति हतः प्रेत्य महाफलं ॥ न युद्धधर्माच्छ्रेयान्वै पंथाः स्वर्गस्य कौरवाः ॥ अचिरे
॥३३॥ णैव तान्लोकान्हतो युद्धे ध्वविप्सिय ॥ श्रुत्वा तु वचनं तस्य पूजयित्वा च पार्थिवाः ॥ पुनरेवान्व
र्ततंत पांडवानाततायिनः ॥ तानापततएवाशु व्यूढानीकाः प्रहारिनः ॥ प्रत्युद्ययुस्तदा पार्था जयगृध्रा
प्रमन्यवः ॥ धनंजयो रथेनाजावभ्यवर्तत वीर्यवान् ॥ विस्फते त्रिशूले कोषु गांडीवं विक्षिपं धनुः ॥
माद्रीपुत्रौ च सकुनिं सात्यकिश्च महाबलः ॥ जवेनाभ्यपतन्वीरा यतो वित्ता वृकं बलं ॥ ॥ इतिमहाभा
रते शल्यपर्वणि ॥✿॥ ॥ संजय उवाच ॥ ॥ सन्निवृत्ते बलौघे तु साल्वो म्लेच्छगणाधिपः ॥
अभ्यधावत संक्रुद्धः पांडूनां सुमहद्बलं ॥ आस्थाय सुमहानागं प्रभिन्नं पर्वतोपमं ॥ दृप्त
मैरावणप्रख्यममित्रगणमर्दनं ॥ योसौ महाभद्रकुले प्रसूतः सुपूजितो धार्तराष्ट्रेन नित्यं ॥
सुकल्पितः शास्त्रविनिश्चयज्ञैः सदोपवाह्यः समरेषु राजन् ॥ तमास्थितो नागवभूव यथो
दयस्थः सविता क्षपांते ॥ स तेन नागप्रवरेण राजन्नभ्युद्ययौ पांडुसुतान्समंतात् ॥ शितैः
पृषत्कैः विददार चापि महेंद्रवज्रप्रतिमैः सुघोरैः ॥ ततः शरान्वै सृजतो महारणे योधाश्च रा
जन्नयतो यमाय ॥ नास्यांतरं ददृशुः स्वे परे वा यथा पुरा वज्रधरस्य दैत्याः ॥ ये वारणस्य क्वयमं
विमृद्नतो दैत्याः पुरा वासवस्येव राजन् ॥ ते पांडवाः सोमकसृंजयाश्च तमेक नागं ददृशुः स ॥३३॥
मंतान् ॥ संद्राव्यमाणं तु बलं परेषां परीतकल्पं विबभौ समंतात् ॥ सेनावतस्तास समरे गजशं
तया विमृद्यमानं तु परस्परं तदा ॥ ततः प्रभग्ना सहसा महाचमूः सपांडवी भीमसेनेन नराधिपेण ॥
दिशस्त्रस्ता सुः सहसा प्रधाविता गजेंद्रवेगं तमपारयंती ॥

दृष्ट्वा च तं वेगवतीं प्रपन्नां सर्वे तदीया युधि योधमुख्याः ।। संपूजयंतस्तु नराधिपं
ते शंखान्प्रदध्मुः शशिसन्निकाशान् ।। श्रुत्वा निनादं त्वथ कौरवाणां हर्षाद्विमुक्तं सह शं
खसब्दैः ।। सेनापतिः पांडवसृंजयानां पंचालपुत्रो न ममर्ष कोपात् ।। ततस्तु तं वै द्विरदं मह
त्मा प्रत्युद्ययौ त्वरमाणो जयाय । प्रभो यथा शक्रसमागमे वै नगेंद्रमैरावणमिंद्रवाहं ।। तमा
पतंतं सहसा च दृष्ट्वा पांचालराजं युधि राजसिंहः ।। तं वै द्विपं प्रेषयामास तूर्णं वधाय रा
जन्द्रुपदात्मजस्य ।। स तं द्विपं सहसाभ्यापतंतमविध्यदग्निप्रतिमैः पृषत्कैः ।। कर्मारधौतै
र्निशितैर्ज्वलद्भिर्नाराचमुख्यैस्त्रिभिरुग्रवेगैः ।। ततोऽपरान्पंच शितान्महात्मा नाराचमुख्यान्
विससर्ज कुंभे ।। स तैस्तु विद्धः परमद्विपो रणे तदा परावृत्य भृशं प्रदुद्रुवे ।। तं नागराजं सहसा
प्रणुन्नं विद्राव्यमाणं च निगृह्य शाल्वः ।। तोत्रांकुशैः प्रेषयामास तूर्णं पांचालराजस्य रथं प्रदिश्य ।।
दृष्ट्वापतंतं सहसा तु नागं धृष्टद्युम्नः स्वरथाच्छीघ्रमेव ।। गदां प्रगृह्याशु जवेन वीरो भू
मिं प्रपन्नो भयविह्वलांगः ।। स तं रथं हेमविभूषितांगं साश्वं ससूतं सहसा विमृद्य
तमुत्क्षिप्य हस्तेन महाद्विपोऽपि विपोथयामास वसुंधरातले ।। पांचालराजस्य सुतं स दृष्ट्वा
तदार्दितं नागवरेण तेन तमन्वधावत्सहसा जवेन भीमः शिखंडी च शिनेश्च नप्ता ।। शरैश्च
घोरैः स्वसहसा निगृह्य तस्याभितोऽभ्यापततो गजस्य ।। स संगृहीतो रथिभिर्गजो वै चच
लतैर्वार्यमाणश्च संख्ये ।। ततः पृषत्कान्प्रववर्ष राजा सूर्यो यथा रश्मिजालं समंतात् ।। तेनाशुगै
र्वध्यमाना रथौघाः प्रदुद्रुवुस्तत्र तथैव सर्वे ।। तत्कर्म शाल्वस्य समीक्ष्य सर्वे पांचालमत्स्या नृप
संजयाश्च ।।

हाहाकारैर्नादयंतः स्म युद्धे द्विपं समंताद्रुरुधुर्नरेंद्राः ॥ पांचालराजस्त्वरितस्तु शैलोगदां प्रगृह्य
चलप्रशृंगतुल्यां ॥ ससंभ्रमं भारतसन्नवीरो जवेन वीरोनुससार नागं ॥ ततस्तु नागं धरणीध
राभं मदस्रवंतं जलदप्रकाशं ॥ गदां समासाद्य भृशं जघान पंचालराजस्य सुतस्तरस्वी ॥ स भिन्न
कुंभः सहसा विनद्य मुखात्प्रभूतं क्षतजं विमुंचन् ॥ पपात नागो धरणीधराभः क्षितिप्रकंपाच्चलि
तो यथाद्रिः ॥ निपात्यमाने तु तदा गजेंद्रे हाहाकृते तव पुत्रस्य सैन्ये ॥ स साल्वराजस्य सिनि
मुखेन जहार भल्लेन सिरः शितेन ॥ हतोत्तमांगो युधि सात्वतेन पपात भूमौ सह नागराज्ञा ॥
यथाद्रिशृंगं सहसा प्रणुन्नं वज्रेण देवाधिपचोदितेन ॥ ✿ ॥ ॥ इति महाभारते शल्यपर्वणि ॥
॥ संजय उवाच ॥ ॥ तस्मिंस्तु निहते शूरे शाल्वे समितिशोभने ॥ तवाभज्यद्बलं वेगाद्वातेने
व महाद्रुमाः ॥ तत्प्रभग्नं बलं दृष्ट्वा कृतवर्मा महारथः ॥ दधार समरे शूरः शत्रुसैन्यं महाबलं ॥
संनिवृत्तास्तु ते वीरा दृष्ट्वा सात्वतमाहवे ॥ शैलोपमं स्थितं राजन् कीर्यमानं शरैर्युधि ॥ ततः प्रववृते
युद्धं कुरूणां पांडवैः सह ॥ निवृत्तानां महाराज मृत्युं कृत्वा निवर्तनं ॥ तत्राश्चर्यमभूद्युद्धं सात्वत
स्य परैः सह ॥ यदेको वारयामास पांडुसेनां दुरासदां ॥ तेषामन्योन्यसुहृदां कृते कर्मणि दुष्करे ॥
सिंहनादः प्रहृष्टानां दिवस्पृक् सुमहानभूत् ॥ तेन शब्देन वित्रस्तान् पंचालान् भरतर्षभ ॥ शिने
र्नप्ता महाबाहुरन्वपद्यत सात्यकिः ॥ स समासाद्य राजानं क्षेमकीर्तिं महाबलं ॥ सप्तभिर्निशितै
र्बाणैरनयद्यमसादनं ॥ आयांतं तं महाबाहुं प्रक्षिपंतं शितान् शरान् ॥ जवेनाभ्यपतद्धीमा
न् हार्दिक्यः शिनिपुंगवं ॥ तौ सिंहाविव नर्दंतौ धन्विनौ रथिनौ वरौ ॥ अन्योन्यमभिधावंतौ

शस्त्रप्रवरधारिणे॥ पांडवेषु सहपांचालैर्योधाश्चान्ये नरोत्तमाः॥ प्रेक्षकाः समपद्यंत तयोर्घोर
समागमे॥ अभिजघ्नतुरन्योन्यं प्रहृष्टाविव कुंजरौ॥ चरंतौ विविधान्मार्गान्हार्दिक्यशि
निपुंगवौ॥ मुहुरादृश्यतामेतौ बाणवृष्ट्या परस्परं॥ चापवेगाबलोद्भूतान्मार्गणान्वृष्णि
सिंहयोः॥ आकाशे समपश्याम पतंगानिव शीघ्रगान्॥ तमेकं सत्यकर्माणमाविध्यत्त
रमेत्रिभिः॥ ततः पूर्वयिगोसेष्ठः कृतवर्मा सितासितैः॥ सात्यकिं त्रिभिराहत्य धनुरेकेन चि
च्छिदे॥ निकृत्तं तद्धनुःश्रेष्ठमपास्य शिनिपुंगवः॥ अमस्यमानो धनुषःच्छेदनं कृतवर्मणा॥
कुपितोतिरथः शीघ्रं कृतवर्माणमभ्यगात्॥ ततः सुनिशितैर्बाणैर्दशभिः शिनिपुंगवः॥ ज
घान ससुतं स्वाश्चाश्वा ध्वजं च कृतवर्मणः॥ ततो राजन्महेष्वासः कृतवर्मा महारथः॥ हताश्वसूतं
संप्रेक्ष्य रथं हेमपरिष्कृतं॥ रोषेण महताविष्टः शूलमुद्यम्य मारिष॥ चिक्षेप भुजवेगेन जिघांसुः
शिनिपुंगवं॥ तच्छूलं सात्वतो बाणैर्जालो निर्भिद्य निशितैः शरैः॥ चूर्णितं पातयामास मोहय
न्निव माधवं॥ ततोपरेण भल्लेन हृद्येनं समताडयत्॥ स युद्धे युयुधानेन हताश्वो हतसारथिः॥
कृतवर्मा कृतास्त्रेण धरणीं प्रत्यपद्यत॥ तस्मिन्सात्यकिना वीरे द्वैरथे विरथीकृते॥ समपद्य
त सर्वेषां सैन्यानां सुमहद्भयं॥ पुत्रस्य तव सैन्यस्य विषादश्चाप्यवर्तत॥ हतसूते हताश्वे च
विरथे कृतवर्मणि॥ हताश्वं च समालक्ष्य हतसूतमरिंदमं॥ अभ्यधावत्कृपो राजन्जि
घांसुः शिनिपुंगवं॥ तं चारोप्य रथोपस्थे मिषतां सर्वधन्विनां॥ अपावाह महाबाहुस्तू
र्णमायोधनादपि॥ शैनेयेनाधिष्ठिते राजन्विरथे कृतवर्मणि दुर्योधनबलं सर्वं पुनरासीत्परां
मुखं॥

शल्य

तमसेनाववल्लुध्यतस्यैन्येतुरजसावृते॥ तावकाःप्रद्रुवान्राजन्दुर्योधनमृतेनृपं॥ दुर्योध
नस्तुसंप्रेक्ष्यभग्नंवलंसमंततोकात॥ जवेनाभ्ययवत्तदूपंसिर्वाश्वेवमाधिवाष्यसंप्रमंहु
श्चसुवनिसं॥३५॥ क्रुद्धोधृष्टद्युम्नंचपार्षतं॥ सिखंडिनंद्रौपदेयान्पंचालानांचयेगणाः॥ केके
यान्सोमकांश्चैवपंचालांश्चैवमारिष॥ असंभ्रमंदुराधर्षःशितैःशस्त्रैरवारयत्॥ आतिष्ठ
दाहवेयत्तःपुत्रस्तवमहाबलः॥ यथायज्ञेमहानग्निर्मंत्रपूतःप्रकाशवान्॥ तंपरेनानुप
श्यंतमसामिक्रमिहाहवे॥ अथान्यंरथमास्थायहार्दिक्यःसमपद्यत॥ ॥ ॥इतिमहा
भारतेशल्यपर्वणि॥ ॥संजयउवाच॥ ॥पुत्रस्तेमहाराजरथस्थोरथिनांवरः॥ दुरुत्सहो
भोयुद्धयथारुद्रःप्रतापवान्॥ तस्यबाणसहस्रैस्तुप्रच्छन्नाह्यभवन्मही॥ परांस्यनिशितैर्वा
णैर्धारासिरिवपर्वतान्॥ नचसोस्तिपुमान्कश्चित्पांडवानांमहाहवे॥ हयोगजोरथोवापि
यास्यबाणैरविक्षतः॥ यंयंहिसमरेयोधंप्रपश्यामिविशांपते॥ सतुबाणैश्चितोभूद्दपुत्रेण
तवभारत॥ यथासैन्येनसद्रु २ तेनवाहिनीप्रसदृश्यत॥ संछन्नातथाबाणैर्महात्मानः ॥३५॥
वानभूतावपश्यामपृथिवींपृथिवीपते॥ दुर्योधनेनप्रहतांस्तिप्रहस्तेनधन्विना॥ तेषुयोध
सहस्रेषुतावकेषुपरेषुच॥ एकोदुर्योधनश्चापिसपुमानितिमेमतिः॥ तत्राद्भुतमपश्याममतव
पुत्रस्यविक्रमं॥ यदेनंसहितापार्थानानुवर्ततभारत॥ युधिष्ठिरंशतेनाजौ विव्याधभरतर्ष
भ॥ भीमसेनंचसप्तत्यासहदेवंचसप्तभिः॥ नकुलंचचतुःषष्ट्याधृष्टद्युम्नंचपंचभिः॥ सप्तभि

द्रोपदेयास्त्रिभिर्विव्याध सात्यकिं॥ धनुश्चिच्छेद भल्लेन सहदेवस्य मारिष॥ तदपास्य
धनुश्छिन्नं माद्रीपुत्रः प्रतापवान्॥ अभ्यधावत राजानं प्रगृह्यान्यन्महद्धनुः॥ ततो दुर्योधनं
संख्ये विव्याध दशभिः शरैः॥ नकुलश्च ततो वीरो राजानं नवभिः पुनः॥ शरैर्घोररूपैर्महेष्वा
सो विव्याध ननाद च॥ सात्यकिश्चापि राजानं शरेणानतपर्वणा॥ द्रौपदेयास्त्रिसप्तत्या
धर्मराजश्च पंचभिः॥ अशीत्या भीमसेनश्च शरै राजानमार्दयत्॥ समंतात्कीर्यमाणस्तु बाणै
वर्षैर्महात्मभिः॥ न चचाल महाराज सर्वसैन्यस्य पश्यतः। लाघवं सोष्ठवं चापि वीर्यं चैव म
हात्मनः॥ अतीव सर्वभूतानि ददृशुः सर्वमानवाः॥ धार्तराष्ट्रोऽपि राजेंद्र यात्वा तु स्वल्पमंतरं। अ
पश्यमानो राजानं पर्यवर्तत दंशितः॥ तेषामापततां घोरस्तुमुलः समजायत। क्रुद्धस्य हि सम
रेऽस्य प्रवृद्धकाले यथा निशि॥ समासाद्य रणे दक्षं राजानमपराजितं। प्रक्षिपंत महेष्वासा
पांडवानां ततायिनः॥ भीमसेनं रणे क्रुद्धं द्रोणपुत्रोऽन्यवारयत्॥ ततो बाणैर्महाराज प्रयुक्तैः सर्व
तो दिशं॥ नाज्ञायंत रणे वीरा न दिशः प्रदिशः स्तथा॥ तावुभौ क्रूरकर्माणि उभौ भारत दुःसहौ॥ घो
रूपमयुध्येतां कृत प्रतिकृतैषिणौ॥ त्रासयंतौ जगत्सर्वं ज्याक्षेपकठिनत्वचौ॥ शकुनिस्तु रणे
वीरो युधिष्ठिरमतापयत्॥ तस्याश्वाश्चतुरो हत्वा सुबलस्य सुतो विभुः॥ नादं चकार बलवान्सर्वसै
न्यानि कंपयन्॥ यतस्मिन्नंतरे वीरं राजानमपराजितं। अपोवाहरणे राजन्सहदेवः प्रतापवान्॥
अथान्यं रथमास्थाय धर्मराजो युधिष्ठिरः॥ शकुनिं नवभिर्विद्ध्वा पुनर्विव्याध पंचभिः॥ ननाद च महानादं
प्रवरः सर्वधन्विनां॥ तद्युद्धमभवच्चित्रं घोररूपं च मारिष। ईक्षणां प्रीतिजननं सिद्धचारणसेवितं।

शल्य०

।।३८

उलूकस्तु महेष्वासं नकुलं युद्धदुर्मदं।। अभ्यद्रवदमेयात्मा सरवर्षैः समंततः।। तथैव न
कुलःशूरः सौबलस्य सुतं रणे।। शरवर्षेण महता समंतात्पर्यवारयत्।। तौ तत्र समरे वीरौ कु
लपुत्रौ महारथौ।। योधयंतावपश्येतां परस्परकृतागसौ।। तथैव कृतवर्माणि सैनेयशत्रुता
पनः।। योधयन्ससुभे राजन् बलं शक्र इवाहवे।। दुर्योधनो धनुश्छित्वा धृष्टद्युम्नस्य संयुगे।।
तथैव छिन्नधन्वानं विव्याध निशितैः शरैः।। धृष्टद्युम्नोपि समरे प्रगृह्य परमायुधं।। राज
नं योधयामास पश्यतां सर्वधन्विनां।। तयोर्युद्धं महच्चासीत् संग्रामे भरतर्षभ प्रभिन्नय
र्यथासक्तं मत्तयोर्वरहस्तिनोः।। गौतमस्तु रणे क्रुद्धो द्रौपदेयान्महारथान्।। विव्या
ध बहुभिः शरैः शरैः सन्नतपर्वभिः।। तस्य तैराभवद्युद्धमिंद्रियैरिव देहिनः।। घोररूप
मसंवीतं निर्मर्यादमतीव च।। ते च तं पीडयामासुरिंद्रियाणीव बालिशं।। स च तां प्रति
सं रब्धप्रत्ययोधयदाहवे।। एवं चित्रमभूद्युद्धं तस्य तैः सह भारत।। उत्थायोत्था
य यथा देहिनामिंद्रियैर्विभो।। नराश्चैव नरासार्द्धं दंतिनो दंतिभिस्तथा।। हया हयैः समा
